वाणीं भजत गैर्वाणीम् !

कविजीवितानि

कर्ता – के. सि. जयचन्द्रशास्त्री

प्रकाशकाः

संस्कृतभाषा प्रचारिणी सभा

चित्तूरु – 517001.

सर्वं स्वाम्यं
सभाधीनम्

1985

मूल्यम्
Rs 3–50

सं॰ भा. प्र. सभायाः एकत्रिंशत्कुसुमम् ।

वाणीं भजत गैर्वाणीम् !

कविजीवितानि

संकलनकर्ता – के. सि. जयचन्द्रशास्त्री
शिरोमणिः

प्रकाशिका

संस्कृतभाषाप्रचारिणी सभा
चित्तूरु – 517001.

सर्वं स्वाम्यं सभाधीनम्

1985

मूल्यम्
Rs 3–00

प्रथममुद्रणम् 1985 1000 प्रतय:

विजय प्रेस्
चित्तूरु 517 001
फोन 2113

विषयसूचिका

1.	भगवान् व्यासः	1
2.	वाल्मीकिः	3
3.	जगन्नाथपण्डितः	5
4.	भवभूतिः	7
5.	भारविः	11
6.	माघः	15
7.	बाणभट्टः	18
8.	भासः	21
9.	हर्षवर्धनः	25
10.	कालिदासः	29

—:o:—

विज्ञाप्तिः

सुहृदः ! सहृदयपण्डिताः ! !

बहोः कालादनन्तरं इयं संस्कृतभाषाप्रचारिणी सभा नूतन-पाठ्य-प्रणालीं प्रवेशयति। तदन्तर्गततया "कविजीवितानि" इति नाम्ना पाठ्य-पुस्तकं प्रसिद्ध-संस्कृत-कवीनां परिचयं कल्पयितुं श्रीमता के. सि. जयचन्द्रशास्त्रि महाशयेन विरचित विचक्षणपरीक्षार्थं नियत मस्ति। अस्मिन् पाठ्य-पुस्तके प्रसिद्धकवीनां दशोपदशानां जनन-काल-देश-कृतीनां उल्लेखनेन साकं तदीय काव्य-वैशिष्ट्यादिक मप्युपपादित मस्ति।

विचक्षण परीक्षार्थिनः अध्यापकपण्डिताः संस्कृताभिमानिनः प्रचारकबन्धवश्च इदं सादरं स्वीकुर्यु रिति स्खालित्यानि चे त्स्यु स्तर्हि कृपया सूचयेयुरिति च विज्ञाप्यते।

श्रीमान् के. सि. जयचन्द्राशास्त्री महोदयः इतोऽप्यधिकं संस्कृतस्य प्रचाराय सहयोगं दद्यादिति आशंसाना वयं तस्मै पण्डितवर्याय कृतज्ञतां प्रकटयामः।

प्रकाशकमन्त्री,
सं. भा. प्र. सभा,
चित्तूरु।

भगवान् व्यासः



भगवतो नारायणस्यांशेनाऽयं मुनिरवातरदिति निश्चयः। अस्य कृष्णः कृष्णद्वैपायनः इत्यपि नामान्तराणि। अयं व्यासः वसिष्ठस्य नप्ता, शक्तेः पौत्रः, सत्यवती पराशरयोः पुत्रः, शुकस्य पिता इति पौराणिकः सम्प्रदायः। अयं व्यासः अनन्तवेदराशिं ऋग्यजुस्सामाधर्वणरूपेण चतुर्धा (विभज्य) वेदव्यास इति बिरुदभागासीत्। भविष्यत् कालिकमानवा अल्पमेधसः भवेयुरिति विचिन्त्य एवं विभागं कृतवानिति प्रतीतिः। महाभारत मनेन विरचितम्। भारते अनेकानि उपाख्यानानि सन्ति। तस्मादस्य इतिहासत्वं सिद्धं एव, तथाऽपि तेषामुपाख्यानानां उपदेश रूपत्वेन काव्यत्वमपि सिद्धं भवति। अस्मिन् ग्रन्थे अष्टादश पर्वाणि वर्तन्ते। चतुर्विधपुरुषार्थानां सर्वेषाञ्च विषयाणां विस्तरेण कथनात् अस्य महत्वम्॥ "अत एव महत्वात् भारवत्वाच्च महाभारत मीर्यते"॥

उक्तं च भगवतैव "धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ। यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्" इति। भारवत्वाच्चास्य, वेदचतुष्टय समकक्षता-प्राप्तेरेव। भारतं पञ्चमो वेदः इति प्रसिद्धिः। "नारायण

नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं चैव ततो जयमुदीरयेत्" इति भारते प्रतिपर्व, दृश्यते । अत्र जय-शब्देन भारत मेवोच्यते । अष्टादश पुराणानि उपपुराणानि च भगवता व्यासेन लिखितानीति प्रसिद्धिः । पुरापि नवमिति पुराणपदस्य व्युत्पत्तिः । "सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंशानुचरितं चेति पुराणं पञ्च-लक्षणम्" इति पुराणलक्षणम् । केचन तेषां पुराणानां संकलनकर्ता व्यास इति वदन्ति ।

श्रीमद्भागवतम्

सर्वथा पुराणेषु भागवतं अत्यर्थं मुत्कृष्टं भवति । व्यासः अन्ततः आत्मशान्ति मलभमानः भगवल्लीलारूपं भागवतमलिखदिति, प्रतीतिः । अत्राऽपि उपकथाः अनेकाः वर्तन्ते । विविधानि पद्यवृत्तान्यपि प्रयुक्तानि । भाषाऽपि मधुरा वर्तते । कथाः सहृदय हृदयान्यावर्जयन्ति । प्रजानां भक्तिभावं विस्तारयति श्रीमद्भागवतम् । अयमपि ग्रन्थः रामायणवत् प्रसिद्ध एव ।



श्रीः

वाल्मीकिः

★

अस्य महर्षेः जन्मकालादिकं निश्चित्य वक्तुं न शक्यते । ऋक्षः भार्गवः प्राचेतसः इति अस्य नामान्तराणि । अयं महाकविः "प्रथमं क्रूरः किरात आसीत् । कदाचित् महर्षिप्रसादात् रामनामजपपरायणस्सन् महारण्ये कस्मिन्श्चित् स्थले उपाविशत् । तदेकतानतया वर्तमानस्यास्य शरीरं वल्मीकः आच्छादयति स्म । बहोः कालादनन्तरं सप्तर्षिभिः समाहूतः बहिरागतवान् । तदाप्रभृत्यस्य वाल्मीकिरिति नामाभूदिति लोके प्रवादः अस्ति । वाल्मीकिः आदिकविरिति, रामायणं आदिकाव्यमिति-प्रख्यातिरस्ति । "वेदवेद्ये परे, पुंसि जाते दशरथात्मजे । वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना ।" इति वचनात् परात्परः दशरथस्य पुत्रत्वेन, संजात इति, वाल्मीकेर्वदनारविन्दात् वेद एव साक्षाद्रामायणरूपेण निजगामेति च ज्ञायते । अतः कविकाव्ययोः महत्वं पूज्यत्वं च सूचितं भवति । अयं तपोधनः गङ्गायाः तमसायाश्च तीरे न्यवसदिति अभ्यहितुं शक्यते । कदाचित् अयं महर्षिः शिष्यैस्सह स्नातुं तमसामगात् । तदा तत्र कश्चन व्याधः काममोहितयोः क्रौञ्चपक्षिणोरेकं अवधीत् । तादृशदृश्यदर्शनेन वाल्मीकिः भृशं शोक-

मवाप्तवान् । स शोक एव श्लोकरूपेण "मा निषाद ! – प्रतिष्ठां त्वमगमश्शाश्वतीस्समाः । यत् कौञ्चमिथुनादेक-मवधीः काममोहितम्" । इति वाल्मीकेः वदनात् निस्ससार । अयमेव श्रीमद्रामायणमहाकाव्यस्य आद्यः नान्दीश्लोकः किरातं प्रति शापरूपश्च भवति । अनेन श्लोकेन विरचिष्यमाणकाव्यस्य कृत्स्नस्य अर्थः सूचितो भवति । अस्मिन् काव्ये चतुर्विंशतिसहस्रश्लोका वर्तन्ते । ग्रन्थोऽयं काण्डषट्कत्वेन विभक्तः । तत्तद्वर्णनानुगुणतया तत्तत्काण्डानां नाम कृतम् । किन्तु सुन्दरकाण्डस्य न तथा । अस्मिन् काण्डे सर्वमपि सुन्दरं भवति । अतः तन्नाम तस्य उचितमेव भवति । रामायणस्य पारायणेन पुण्यं सर्वकाम्यसिद्धिश्च भवतीति आस्तिकानां विश्वासः । तत्राऽपि सुन्दरकाण्डस्य प्रत्येकं स्थानं वर्तते । बहवः सुन्दरकाण्डं पारायणं कुर्वाणाः स्वाभीष्टानि प्राप्नुवन्ति । आदिकवेरस्य आदिकाव्यं कवीनां मार्गदर्शकमासीदिति कथने न काप्यतिशयोक्तिः । काव्येऽस्मिन् तदानीन्तन-भौगोळिकस्थितिः, नागरिकता, पत्तनानां, जनपदानाञ्च वैभवः, साङ्घिकव्यवहाराः, ऋषीणां ऋषिपल्लीनां च वैभवं, पालकानां प्रजापरिरक्षणरीतिः, प्रजानां राजभक्तिः नीतिनियमाश्च सम्यगुपवर्णिता, विराजन्ते । "आदिराज यशोबिम्बं, आदर्शं प्राप्य वाङ्मयम् । तेषामसन्निधानेऽपि, न स्वयं पश्य नश्यति । इति वचनानुसारेण पुरुषोत्तमस्य रामस्य चरितं, वाल्मीकिनिर्मितरामायणादर्शं प्राप्य अवि-नाशि सत् । इदानीमपि लोकानुद्धरत इति शम् ॥

जगन्नाथपण्डितः

त्रिलिंगदेशे वेगिनाडु ब्राह्मणवंशः इदानीमपि प्रसिद्धः वर्तते। तस्मिन् वंशे पेरुभट्टाख्य ब्राह्मणोत्तमः आसीत्। स तु वारणासीं गत्वा ज्ञानेन्द्रभिक्षोः वेदान्तशास्त्रम्, महेन्द्रपण्डितात् न्यायवैशेषिकदर्शने, खण्डदेवात् पूर्वमीमांसा, वीरेश्वरपण्डितात् महाभाष्यञ्च पपाठ। तस्य पेरुभट्टस्य धर्मपत्नी लक्ष्मी नाम्नी। तयोर्दम्पत्योः रेव पुत्रः श्रीजगन्नाथपण्डितः। प्रायशः अयं स्वपितुरन्तिक एव सर्वाणि शास्त्राणि पठितवान्। स्वपितुर्गुरोः वीरेश्वरपण्डितादपि अभ्यस्तवानिति मनोरमाकुचमर्दनाख्यात् ग्रन्थात् ज्ञायते। 6 Ad कालिकोऽयं भट्टोजीदीक्षित अप्पय्यादीक्षितयोः समकालिक इति ज्ञायते। तस्मिन् काले शाहजहान् नाम यवन चक्रवर्ती दिल्लीनगरे राज्यं पालयन् आसीत्। तरुणोयं पण्डितराजः दिल्लीनगरं गत्वा शाहजहान् चक्रवर्तिनः आस्थाने प्रवेशं लब्धवान्। शाहजहान् चक्रवर्ती जगन्नाथस्य पाण्डित्येन नितरां सन्तुष्य पण्डितराजबिरुदेन अमुं कविं समाजयामास। यौवनकाले शाहजहानस्य तत्पुत्रस्य च आस्थाने कालं यापयामास। यवनसभामलङ्कृत्य तैस्सम्मानितः, संस्कृतकविपण्डितः अयमेक एवे वक्तुं शक्यते।

अस्य ग्रन्थाः त्रयोदश इति प्रतीतिः। यमुना-स्तुतिरूपः। अमृतलहरी। नवाब् आसफ़खानस्य स्तुति-रूपः (2) आसफ विलासः, विष्णुस्तुतिपरा (3) करुणा-लहरी। अप्पय्यदीक्षितेन रचितायाः चित्रमीमांसायाः खण्डनपरं (4) चित्रमीमांसा खण्डनम्। शाहजहान् पुत्रस्य दाराशाहस्य स्तुतिपरं (5) जगदाभरण गङ्गा-लहरी नाम्ना प्रसिद्धा कतिपयटिप्पणीसमेता (6) पीयूष-लहरि-कामरूपदेशाधिपतेः नारायवर्णनरूपं स्वकृतटिप्पणी-समेतं (7) प्राणाभरणम्। जगन्नाथविरचितं पद्यसंग्रहरूपः टीकासहितः (8) भामिनीविलासः, भट्टोजिदीक्षित-विरचित मनोरमायाः खण्डनरूपः (9) मनोरमाकुचमर्दनम्। (10) यमुनावर्णनम्। गद्यग्रन्थोऽयं नोपलभ्यते। किन्तु द्वित्राणि गद्यानि रसगङ्गाधरे उदाहृतानि दृश्यन्ते। (11) लक्ष्मीलहरि (12) सुधालहरी (13) रस-गङ्गाधरः। अयमस्य कवेः ग्रन्थेषु मुख्यः। किं त्वयं ग्रन्थः असंपूर्ण इव भाति। अस्य रचनाः साकल्येन अद्यापि न समासादिताः। चित्रमीमांसवत् अयमपि ग्रन्थः (रस-गङ्गाधरः) असंपूर्ण एव। एनं कविराजमधिकृत्य काश्चन जनश्रुतयः वर्तन्ते। तास्वेकात्र उदाह्रियते - यदा दिल्ली नगरचक्रवर्तिनां आस्थाने आसीत् तदा लब्धबहुविधवैभवः तरुणश्चायं कविः " कस्यांचन यवन्यां कृतानुरागः तया साकं ऐहिकसुखान्यनुभवन्नासीत्। गच्छता कालेन पण्डितराजस्य

प्रेमास्पदं सा यवनी दिवंगता । यवनीविरहेण व्यथितोऽयं जगन्नाथः प्रापंचिकविषयेषु विरक्तः दिल्लीं परित्यज्य वाराणासी मगात् । अस्य जगन्नाथस्य यवनीसंपर्कमाकर्णितवद्भिः तत्रत्यैः पण्डितैः भृशं निन्दितः, तिरस्कृतश्चायम् । तस्मात् अनिर्वृतोऽयं कविराजः ।

स्वकीयां गङ्गालहरीं पठन् प्रवृद्धायां गङ्गायां निमज्जदिति । अस्यां कियत् सत्यमिति वक्तुं न शक्यते ।

अपि च शशिसेना पण्डितराजशतकं चेति ग्रन्थद्वयमप्यनेन रचितमिति प्रतीतिः वर्तते । तर्कपंचानन मैथिल मिश्रसूरिप्रभृतयः केचन संस्कृतपण्डिताः जगन्नाथपदपूर्विका वर्तन्ते ।।



भवभूतिः



कविरयं 7 Th Ad. उत्तरकालिक इति ज्ञायते । विदर्भदेशे पद्मपुरं अस्य जन्मस्थानम् । अयं भट्टगोपालस्य पौत्रः । जातुकर्णीनीलकण्ठयोः पुत्र । अस्य गुरुः ज्ञान निधिः । अयं श्रीकण्ठः काश्यपः । कृष्णयजुर्वेदीय तैत्तिरीय शाखाध्यायी । भवभूतिरिति अस्य उपाधिः । भवभूतिरित्युपाधिप्राप्तेः काश्चन उक्तयः वर्तन्ते । यथा भवस्येव = शिवस्येव, भूतिः = ज्ञानसंपत्तिर्यस्य स इति

एकरूपा। परमेश्वरः भिक्षुरूपेणागत्य अस्मै श्रीकण्ठाय भूतिं = ज्ञानसम्पदमयच्छत् इत्यन्या। अन्याऽपि-'साम्बा पुनातु भवभूतिपवित्रमूर्तिः" इत्यस्य कवेः श्लोकस्य श्रवणेन पुलकितगात्रः राजा भवभूतिः इत्यनेन ख्यापयामासेति। "तपस्वी का गतोवस्यां इति स्मेराननाविव गिरिजायाः स्तनौ वन्दे भवभूति सिताननौ" इति अस्य कवेः श्लोकस्य श्रवणेन सन्तुष्टा जनाः अस्मै भवभूति रित्युपाधि मयच्छन् इत्यपि जनश्रुतिः वर्तते। अयं बाणा-दर्वाचीन इति वक्तुं शक्यते। अयं कविः तर्कव्याकरण मीमांसादि शास्त्रेषु महापण्डितः। अयंरूपकत्रयं रचयामास॥

तत्तु कालप्रियानाथोत्सवसमये आगतानां जनानां मनःप्रह्लादनाय अभिनीतमासीदिति तेनैव ज्ञायते। उज्जयिनीनगरे वर्तमानः महाकालेश्वर एव कालप्रिया नाथ इत्युच्यते। श्रीकण्ठोऽयं उज्जयिन्यां, कान्यकुब्जे, काश्मीरे च पर्यटन्नासीदिति ज्ञायते। स्वजीवितकाले कालिदासादिवत् प्रतिष्ठां न लब्धवानिति। "ये नाम केचिदिह न प्रथयन्त्यवज्ञां जानन्ति ते, किमपि तान्प्रति नैष यत्नः। उत्पत्स्यतेस्ति मम कोऽपि समानधर्मा कालोह्ययं निरवधिः विपुला च पृथ्वी॥" इति अस्य कवेः वचनात् ज्ञातुं शक्यते॥

(1) अस्य रूपकेषु-महावीरचरितमेकम् । अस्मिन् नाटके सप्त अङ्काः वर्तन्ते । अस्मिन् नाटके पञ्चमाङ्कपर्यन्तमेव अनेन भवभूतिना विरचितमिति वदन्ति । सकलोयं ग्रन्थ अनेन भवभूतिना विरचितमित्यपरे । रसपरिपोषाय केचन कल्पिताः अंशाः कविनास्मिन् नाटके विनिवेशिता वर्तन्ते ॥

(2) उत्तररामचरितम्-श्रीमद्वाल्मीकिविरचितोत्तररकाण्डस्य कथां स्वीकृत्य नाटकमिदं रचयामास । अस्मिन् नाटके बहवोंशाः रसपरिपोषणाय कल्पिता दृश्यन्ते । तेषु 'आलेख्यदर्शनम्, आत्रेयीवासन्त्योः, तमसा मुरलयोश्च सम्भाषणम्, वाल्मीक्याश्रमे कौसल्याजनकादीनां समागमः । भरतप्रणीत नाटकप्रदर्शनम्, अन्तिमेङ्के विस्मयावहः सीतारामयोः समागमः" इत्यादयः केचन ॥

'एको रसः करुण एव' इति विः कण्ठरवेण स्वस्य नाटकस्य करुणरसप्रधानत्वं अवदत् । सुखान्ततया नाटकस्य पर्यवसानात् अस्मिन् नाटके करुणविप्रलम्यः अङ्गिरस इति निश्चेतुं शक्यते । महाकवेरस्य अनितरसाधारणकल्पनाकल्पनचकितहृदयेन केनाऽप्युतक्म् ॥ 'उत्तरे रामचरिते भवभूतिर्विशिष्यते" इति "अपिग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ।" इति भवभूति वचनात्, अस्य करुणरसवर्णनचणत्वं प्रकटीकरोति ।

श्रृङ्गाररसप्रधाननाटकेष्विव हास्यस्य अनौचित्यात् अस्मिन् नाटके विदूषकस्य प्रवेशः न कृतः। किन्तु वटूनां सम्भाषणेन अपूर्वाश्वदर्शनसमये यथोचितं हास्यः प्रदर्शितः भवति ॥

(3) मालतीमाधवम् – अस्मिन् दश अङ्काः वर्तन्ते। मृच्छकटिकवदिदमपि प्रकरणम्। अस्मिन् नाटके नायकौ लौकिकौ वृद्धबौद्धसन्यासिनी कामन्दकी नायकयोः संघटने साह्यमाचरति। चक्रस्य नाभिरिव, कामन्दकी नाटकीयवृत्तस्य आधारीभूता। भवभूतिः अस्य नाटकस्य रचनया मालविकाग्निमित्र मनुकरोति स्म। कालिदासानन्तरं कविषु भवभूतिरेव प्रधानम्। भवभूतिः वाच्यप्रधानः, कालिदासस्तु व्यङ्ग्यप्रधानः। भवभूतिः सर्वानपि विषयान्' स्वीयवर्णनावैदग्ध्येन रमणीयान् करोति। कालिदासस्तु रमणीयान् पदार्थान् भावनादृष्ट्या आकलयति। भवभूतेः वाक् गम्भीरा कालिदासस्य तु मृदुला। अयं तु करुणरसप्रियः, कालिदासस्तु श्रृङ्गार रसप्रियः ॥

उभावपि नाटकत्रयं रचयामासतुः। अस्य कवेः नाटकद्वयस्य कथा रामायण मूलिका. कालिदासस्यापि रघुवंशकुमारसम्भवौ रामायणमूलकावेव। एभिः कारणैः द्वयोरप्यनयोः तौल्यं प्रतिभाति इति शम् ॥

भारविः



श्रव्यकाव्यानि भट्टिकालिदासश्रीहर्षभारविमाघ रत्नाकरैः कृतानि। तत्र भारविः प्रायशः कालिदास मनुकरोति। अयं 6 Th Ad. कालिक इति विमर्शकानां अभिप्रायः। अनेन विरचितं काव्यं किरातार्जुनीयम्। एतत्काव्यं पञ्चकाव्येषु अन्यतमम्। एतत् काव्यम् संस्कृताभ्यासकाः अवश्यं पठन्ति। अस्मिन् काव्ये अष्टादश सर्गाः सन्ति। अत्र पाण्डवानां कथा उपवर्णिता नायकः अर्जुनः। प्रतिनायकस्तु, किरातवेषधारी महेश्वरः। वीरस्तु प्रधानो रसः। श्रृङ्गारादयः अङ्गरसाः। दिव्यास्त्रलाभः प्रयोजनम्। आदिमा. त्रयः सर्गाः, पाषाण सदृशा इति प्रतीतिः। 'नारिकेलफलसम्मितं वचो. भावः सपदि तद्विभज्यते॥' इति तद्व्याख्यात्रा मल्लिनाथेन कथितम्। पञ्चमसर्गारम्भे हिमालयमवर्णयत्। नगरार्णव शैलादि काव्यलक्षणानुगुणतया वर्णितानि॥

अल्पाल्पैः पदैः बृहत्तर मर्थं बोधयति भारविः। अत एव "भारवेरर्थगौरवम्" इति लोके प्रतीतिः। काव्येस्मिन् उक्तिप्रत्युक्तिरूपाः वाग्विवादरूपाश्च रमणीयाः अंशाः भूयांसः वर्तन्ते। अलङ्कारेषु अर्थान्तर-

न्यासे कवेरस्य महती प्रीतिरिति ज्ञायते । अर्थान्तरन्यासालङ्कारकथनद्वारा, अनेकान् धर्मान् बहूनि तत्वानि च बोधयति । द्वितीयसर्गे युधिष्ठिरवचनव्याजेन 'स्फुरता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्" इति श्लोकेन "स्वीयमर्थगौरवम् भङ्ग्या प्रतिपादयामास । तादृशमर्थगौरवम् प्रकारद्वयेन ज्ञातुं शक्यते । प्रथमतया अर्थान्तरन्यासेन अनन्तर मुक्ति प्रत्युक्तिभिः लौकिकन्यायनीतिशास्त्रतत्वादि बोधनेन चेति । किरातार्जुनीय काव्यपरिशीलनेनायं कविः, शैव इति वक्तुं शक्यते । "प्रदेशमादेश इवाधितष्टौ" इति कवेरस्य श्लोकेनायं व्याकरणशास्त्राभिमानी इत्यपि वक्तुं शक्यते । कविमेनमुद्दिश्य काचन वार्ता अनुस्यूतया विद्वत्परम्परासु श्रूयते । किन्तु तादृश्यां वार्तायां कियत् सत्यं वर्तत इति निर्णेतुं न शक्यते, अथापि प्रशेचनार्थं मत्रोच्यते ।

भारविरयं बाल्य एव सकलकलापरिपूर्णः सर्वशास्त्रेषु निष्णातः, महाकविश्चासीत् । एकदा स्वगृहमागताः बान्धवाः तत्पितुर्निकटे भारवेः पाण्डित्यं प्राशंसन् । स्वपुत्रस्तुति मसहमानः भारवेः पिता, तान् प्रति "बालएवाऽयं सर्वं न जानाति । अनेन ज्ञातव्यं सुबहु वर्तते" इत्यकथयत् ।

एतत् वार्तां ज्ञात्वा भारविः कुपितस्सन् स्वपितरि जीवति सति, स्वस्य कीर्तिर्नभविष्यतीति निश्चिनोति स्म। तस्मात् कारणात् एकमुसलं गृहीत्वा भोजनसमये स्वपितरं हन्तुं कुड्योपरिभागे निलीन आसीत्।

पितरि भुञ्जाने सति माता तमपृच्छत् "किमयं पुत्रः भारविः मूढः ? वंशवर्धनो न भविष्यति किम् ? इति। तदानीं जनकेन प्रत्युत्तरं दत्तं" हेमूढे ! अहं साधु जानामि भारविरयं महाकविः पण्डित प्रकाण्डश्च ! किन्तु पितृभ्यां पुत्रस्य प्रशंसा न कार्या, कृता चेत् पुत्रस्य आयुः क्षीयत इति प्रसिद्धिः। अपि च आवयोः प्रशंसां श्रुत्वा बालोऽयं गर्वितो भवेत्" इति। एतं वृत्तान्तं सकलमपि आकर्ण्य भारविः सन्तुष्टः सन् भृशं आत्मनः पापाशयस्य लज्जितोऽभूत्॥

शनैः स्वपितरमागत्य, पितृवधोद्युक्तस्य कीदृशः दण्डः विधेय इत्यपृच्छत्। षण्मासपर्यन्तं श्वशुरगृहे निवास इति पित्रोक्तम्। झटिति भारविः पित्रोरनुज्ञया भार्यया साकं श्वशुरगृहमगात्। दिनक्रमेण तत्रत्यानां भारवेरुपरि आदरः मन्दः आसीत्। अन्ततः स भारविः खल्यां सस्यसंरक्षणाय नियुक्तः। एकस्मिन् दिने तस्य भार्या तस्य समीपं गत्वां स्वस्य वस्त्रादीनामभावं विज्ञाप्य विलपितुमारेभे। तदानीं भारविः –

"सहसा विदधीत न क्रियाम्
अविवेकः परमापदां पदम् ।
वृणुते हि विमृश्यकारिणं
गुणलब्धाः स्वयमेव सम्पदः ॥

इति श्लोकं विलिख्य "तस्यै दत्वा, यस्मै कस्मैचित् धनिकाय दत्वा लब्धेन धनेन वस्त्रादिकं क्रीणीष्व इति अवोचत् । तस्य पत्नी तथैव कृतवती । षण्मासानन्तरं भारविः भार्यासमेतः स्वगृहं प्राप्य सुखमुवास । यः तत् श्लोकं क्रीणातिस्म स वैश्यः व्यापारवशात् देशान्तरं गत्वा, बहुकालानन्तरं निशीथसमये स्वगृहमागच्छत् । युवदशां प्राप्तेन स्वपुत्रेग साकं वर्तकस्य भार्या स्वपितवती । तं पर-पुरुषं मन्वानः स वर्तकः, तं हन्तुं यदा खण्डमुद्धृतवान्, तदा खड्गोपरि अट्टकात् पतितं तालपत्रं तस्मिन् च"सहसेति श्लोकं च अपश्यत् । ततः स्वपत्नी मुत्थाप्य यथार्थं विज्ञाय, स्वव्यापाराद्विरराम इति । अस्य कवेः कवितायाः थालीपुलाकन्यायेन एकमुदाहरणम् ॥

"शुचि भूषयति श्रुतं वपुः,
प्रशमस्तस्य भवत्यलङ्क्रिया ।
प्रशमाभरणं पराक्रमः,
सनयापादित सिद्धिभूषणः

★

माघः

संस्कृतकवीनामितरेषामिव कालदेशादि अनिश्चित मेव वर्तते । "तावदथा भारवेर्भाति यावन्माघस्य नोदयः" इति श्लेषेण, माघकवेरुदयात्परं भारविकवेः कीर्तिः लुप्त-प्राया आसीदिति प्रसिद्धैः भारवेरनन्तरकालिक इत्यूह्यते । अपि च नवमशताब्दयां स्थितः आनन्दवर्धनाचार्यः स्वीये ध्वन्यालोके माघराग पद्यानि गृहीतवान् इति ततोऽपि पूर्वकालिकोऽयं माघ इति विभाव्यते । तथा च अष्टम शतकाब्दयाः चरमे, नवमशतकाब्दयाः पूर्वभागे वा, अयं माघः आसीदिति तर्कयते । अयं भोजसमकालिक इत्यपि प्रवादः वर्तते । जितेन्द्रबुद्धाभिदं षष्टशतकाब्दस्थं प्रसिद्धं जैन मधिकृत्य अयं वर्णितवानिति हेतोः तस्मादपि अर्वाचीनकालिकोऽयमिति निश्चितं भवति । अस्य पिता दत्तकः । पितामहस्तु सुप्रभः । अस्य कवेर्निवासः श्रीमालेति भीनमालेति कैश्चित् विमर्शकैः निगद्यते । भीनमालानामकः ग्रामः गुर्जरमालवदेशयोर्मध्ये वर्तत इति केषाञ्चन अभिप्रायः । अनेन विरचितं काव्यं शिशुपाल वधाख्यम् । अस्मिन् काव्ये विंशतिसर्गाः वर्तन्ते महाकाव्यलक्षणानुगुणं काव्ये नगरार्णवशैलादीनां वर्णनं मनोहरं वर्तते । युधिष्ठिरेण क्रियमाणे राजसूययागे कृष्णशिशुपालयोः प्रवृत्तस्य वाग्वादस्य फलतया शिशुपाल

वधः अस्मिन् काव्ये प्रतिपाद्यः अंशः । अर्थालंकारापेक्षया, शब्दालंकारे अस्य कवेः महानादरः । इदं काव्यं सर्वात्मना भारवेः किरातार्जुनीयमनुकरोतीति ज्ञायते ॥

प्रथमसर्गे नारदागमवर्णनस्थः "रणद्भिराघगट्टनया नभस्वत, पृथग्विभिन्नै श्रुतिमण्डलैस्स्वरैः । स्फुटीभवद्ग्राम विशेषमूर्च्छना, मवेक्षमाणं महतीं मुहुर्मुहुः ॥" इति श्लोकः । अन्ये च केचन अस्य सङ्गीतशास्त्रप्रावीण्यं प्रकटयति । द्वितीयसर्गे श्लोकाः यद्यपि आकृत्या अल्पाः अर्थगौरवेण अनल्पास्सन्तः राज्याङ्गसम्बन्धिपरिज्ञानं सूचयन्ति । " यां यां प्रियः प्रैक्षत कातर राक्षी, सा सा ह्रियां नम्रमुखी बभूव । निःशङ्कमन्याः सममाहितेर्ष्यास्तत्रान्तरे जघ्नुरमुं कटाक्षैः" इति चतुर्थसर्गस्य श्लोके वर्तमानः श्रृङ्गारः रसिकजनमनोहरः वर्तते । अस्मिन् एव सर्गे रैवतकाद्रि वर्णनावसरे "उदयति विततोर्ध्व रश्मि रज्जाव हिमकरे हिमधाम्नि चास्तम् । वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्र-लीलम् ॥" इति श्लोके रचनया "घण्टामाघ" इति लोके ख्यातिमाप । अपि चास्मिन्वृत्तानां वैविध्यं प्रदर्श्य स्वीयां कविताचमत्कृतिं प्रादर्शयत् ।

षष्ठसर्गे नियमेन यमकयुक्तान् श्लोकान् विरच्यस्वीये शब्दालङ्काराभिमानित्वं सूचयति । तत्रैव सर्वपादयमकः

"नवपलाशपलाशवनं पुनः स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्त मालोकय त्सुसुरभि सुरभि सुमनोहरैः ।।
"इति श्लोकः तन्त्रीनादवत् लयान्वितः श्रुतिसुभगं वर्तते ।
काव्यस्यास्य परिशीलनेन माघकवेः सर्वशास्त्रकूलङ्कषा
धिषणा व्यक्ती भवति ।

"गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतं
मनीषिणः", "श्रेयसि केन तृप्यते?" "सदाभिमानैकधना हि
मानिनः", "सतीव योषित् प्रकृतिस्सुनिश्चला पुमांस
मभ्येति भवान्तरेष्वपि ।।" "ज्ञातसारोऽपि खल्वेकः संदिग्धे
कार्यवस्तुनि ।। "एवंविधा अर्थान्तरन्यासाः उपमादय श्च
सुमनो मनोहराः वर्तन्ते । अत एव – "मुरारिपदचिन्ता
चेत्तदा माघे रतिं कुरु"

"नवसर्गगते माघे नवशब्दो न विद्यते"
उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ।।
इत्यादयः लोकोक्तयः वरीवर्तन्ते ।।

★

बाणभट्टः



संस्कृत प्राचीनकवयः स्वीयं देशकालादिकं पित्रादीनां बन्धूनाञ्च वृत्तान्तं रचनासु न प्रकटितवन्तः। किन्त्वयं बाणः हर्षचरित प्रथमोच्छ्वासे किञ्चिदेव स्वचरितं वर्णयामास। भाषान्तरापेक्षया संस्कृते गद्य ग्रन्थाः अतीव विरला एव वर्तन्ते। संस्कृते गद्यग्रन्थ कर्तारः सुप्रसिद्धाः, सुबन्धुः, दण्डी, बाणभट्टः, इत्येते त्रयः एव ज्ञायन्ते। पद्यरचनायां, कालिदासस्य यादृशी कीर्तिः वर्तते, तादृश्येव कीर्तिः गद्यरचनायां अस्य कवेः वर्तते। गद्यप्रबन्धरचनायां अयं मार्गदर्शकः प्रवीणश्च, अयं हर्षवर्धनस्य सदस्यः। हर्षवर्धनस्य कालः 610 to 650 पर्यन्तं इति ज्ञायते। अतोऽयं 7 Ad. कालिक इति निश्चेतुं शक्यते। अस्य मूलपुरुषः वत्सः। पिता चित्रभानुः। मातातु राजदेवी। अर्थपतिस्तु पितामहः। अस्य पुत्रस्तु भूषणभट्टः। भट्टबाणस्य पिता चित्रभानुः अपि महाविद्वान् याज्ञिकश्चासीत् इति ज्ञायते। बाल्य एव अस्य माता दिवंगता, पितैव बालस्यास्य पालन पोषण विषये श्रद्धालुः आसीत्। उपनयनसंस्कारादनन्तरं अस्य चतुर्दशवर्षे पितापि स्वर्गतः। पितृभ्यां विरहितोऽयं बालः विचलितहृदय आसीत्। अतः मित्रैः सह सम्मिलितः

देशान्तरेषु भ्रमणं कर्तुं आरेभे। नानाविध राजसंदर्शनेन राज्याङ्गविषयकपरिज्ञानं लब्धवान्, गुरुकुलादीनां संदर्शनेन पण्डित संगति रपि अस्य संजाता। पुनः जन्मभूमिं प्राप्तवान्॥

श्रीहर्षसोदः बाणस्य विख्यातिं श्रुत्वा एनमाह्वापया मास। बाणस्तु कान्यकुब्ज्यं गत्वा आस्थाने महाकवि पदवीं अलंचकार। हर्षचरितं एव अस्य प्रथमः ग्रन्थः, द्वितीयः ग्रन्थः, कादम्बरी। गुणाढ्य कृत बृहत्कथातः गृहीत्वा कादम्बरीं व्यरचयत्। चण्डीशतकं अपि अनेन रचितं इति प्रसिद्धिः। अस्य कादम्बरी ग्रन्थः संस्कृतवाङ्मये सर्वोत्कृष्टः वर्तते। संस्कृताभिज्ञाः सर्वेऽपि एतत् गद्यग्रन्थं कण्ठस्थो कुर्वन्ति। रचना वैविध्यं अपि दृश्यते। तत्र तत्र दीर्घ दीर्घ समासाः निबद्धाः, श्लेषोपमाद्यलङ्कारभूयिष्टं इदं काव्यम्। नानाविधवर्णनैः सहृदयहृदयानि आकर्षति। विशिष्य शुकनासोपदेशः सर्वैरवश्यं पठ्यते। बाणस्य गद्यरचनाभिः संस्कृत वाङ्मयस्य परिपूर्णत्वं संजातम्। पद्यकवीनां आद्यः वाल्मीकिः भवति। सतु पद्यकवितायाः मार्ग दर्शकः आदर्शप्रायश्च भवति। तद्वत् गद्यकवित्वस्य नवीनानां मार्गदर्शिकत्वं अस्यापि सिद्धयति। कादम्बर्यां त्रयाणां जन्मनां अद्भुतकथायाः, उपकथायाश्च मिश्रणेन

किंचित् इव जटिलत्वं पाठकैः अनुभूयत एव । कादम्बर्यां द्रविड धार्मिकस्य वर्णनं, हास्यरसस्य उदाहरणं भवितुं अर्हति । कथागमनं तु उत्तरोत्तरकथापरिज्ञान कुतूहल-मधिकतरं जनयति पठितृणाम् ।

दैववशात् अयं कविः कादम्बरीरचनां असंपूर्णमेव त्यक्त्वा दिवं ययौ । अयं ग्रन्थः द्वेधा पूर्वभागः उत्तरभाग श्चेति विभज्यते । पूर्वभागस्तु भट्टबाण विरचितः, उत्तर भागस्तु तत्पुत्रेण । अयं तेनैव –

याते दिवं पितरि तद्वचसैव सार्धं,
विच्छेदमाप भुवि यस्तु कथा प्रबन्धः, ।
दुःखं सतां तदसमाप्तिकृतं विलोक्य,
प्रारब्ध एष च मया न कवित्वदर्पात् ।।

उक्तम् – कादम्बर्यां रसनायकादिविषय मधिकृत्य स्थूल रूपेण महामहोपाध्याय हरिदास सिद्धान्त वागीशेन –

"चन्द्रापीडोऽनुकूलसकलगुणधरो नायकोऽस्मिन् उदात्तो
नेत्रीकन्याऽन्यदीया मृदुचलित तनुर्मुग्ध कादम्बी च ।
पाञ्चालीनाम रीतिर्विलसति बहुलाविप्रलंभोरसोऽङ्गी,
माधुर्याख्यो गुणो वा कविमुकुटमणेः काव्ययोरव्यमेतत् ।।

इति व्यक्तीकरोति स्म। अस्य कविताया: मुग्धःधर्मदास:—

'रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति।
सा किं तरुणी? नहि नहि वाणी बाणस्य मधुरशीलस्य॥

कादम्बरी मुद्दिश्य Weber. नामकः इत्थं वदति।

कादम्बरी काचिदरण्यानी। तत्र गंतृणां मार्गो न लक्ष्यते। स्वयं कथंचिन्मार्गं परिकल्प्य, प्रवेशे लब्धेपि, अप्रसिद्ध कठिन पदहिंस्रा सत्वैरभिभूयते॥



भासः

उपलभ्यमानेषु रूपकेषु भासनाटकानि एव प्राचीनानि इति निश्चितमेव। एतदीयान्यपि बहुकालं अलब्ध प्रचाराण्येवासन्। किन्तु अनन्तपुरमहाराजैः संस्कृताभिमानिभिः मुद्रापितानीदानीमुपलभ्यन्ते। श्रीमद्भिः गणपतिशास्त्रिप्रभृतिभिः पण्डितैः परिष्कृतानि सोपोद्घातं प्रकटितानीदानीं त्रयोदश संख्याकानि उपलभ्यन्ते। ततोप्यधिकानि भासेन नाटकानि रचितानीति पण्डितानामभिप्रायः। मालविकाग्निमित्रे प्रस्तावनायां भास सौमित्रक कविपुत्राविति भासमधिकृत्य प्रशंसा कृता।

भासस्य रूपकाणां पुरतः स्वीय काव्यानामपकर्ष माशङ्कमानः कालिदासः "पुराणमित्येव न साधु सर्वं" इति श्लोकं व्यरचयदिति केचन वदन्ति। तस्मात् कालिदासकाले भासनाटकानां प्रचारः बहुल आसीदिति वक्तुं शक्यते। कालिदासानन्तरं भासनाटकानाँ प्रचारः लुप्तप्रायं आसीदिति तर्क्यते। तयापि लक्षणकारैः तत्र तत्र भासनाटकेभ्यः श्लोकान् गृहीत्वा उदाहरणतया प्रदर्शिताः। अस्य नाटकेषु पाणिनीय व्याकरणा विरुद्धा प्रयोगाः दृश्यन्त इति कारणात् पाणिनीयव्याकरणप्रसिद्धेः पूर्वमेव इमानिनाटकानि लब्धप्रतिष्टानि अभवन्। मृच्छकटिककर्ता शूद्रकः ii Ad कालिकः। सतु भासकृतं "दरिद्रचारु दत्तमाधारीकृत्य मृच्छकटिकं प्रणिनाय। तस्मात् अयं भासः क्रिस्तोः पूर्वं आसीदिति सुवचं भवति। अस्य कवेः नाटकेषु कानिचन महाभारत कथानुसारीणि। तानि (1) पाञ्चरात्रम् (2) मध्यमव्यायोगः (3) दूतवाक्यम् (4) दूतघटोत्कचम् (5) कर्णभारतम् (6) ऊरुभङ्गः इत्यादीनि॥

तत्र पाञ्चरात्रे अङ्कानां त्रितयं वर्तते। इतराणि एकाङ्किकानि। कानिचित् रामायण कथानुसारीणि – (1) प्रतिमानाटकम् (2) अभिषेकनाटकम् इत्यादीनि। प्रतिमा नाटके अयोध्याकाण्ड मारभ्य काण्ड पञ्चककथा

उपवर्णितास्ति। अभिषेकनाटके किष्किन्धाकाण्डमारभ्य युद्धकाण्डपर्यन्तं कथा वर्तते। बालचरितनाटकन्तु भागवतानुसारि। अत्र कंसवधपर्यन्ता कृष्णकथा वर्णितास्ति। स्वप्नवासवदत्ता प्रतिज्ञायौगन्धरायणादीनि बृहत्कथामनुसृत्य लिखितानि। "किरणावली" नाटकमनेन रचितमिति प्रसिद्धिः। तत्तु, नोपलभ्यते। आहत्य (20) विंशति नाटकानि भासेन रचितानि इति तर्क्यते। अस्य कवेः रचनामाधारीकृत्य स्वस्य कालः आश्रयः देशः बन्धुवर्गः कीदृशी इति निर्णेतुं न शक्यते। अस्य भासस्य श्लोकेषु मनोहरं भावमेव इतरे सुष्टु ज्ञायते। भासनाटकेषु पात्रपोषणं सम्यक् कृतमस्ति। तत्कृतेषु नाटकेषु दुर्योधनपात्रं अतिगम्भीरं मनोहरञ्च कृतमस्ति। मूलकथां रसपोषणाय किल किञ्चिदिव परिष्कृत्य वर्णयाभास। पञ्चरात्रनाटकदर्शनेनायं कविः निरङ्कुशः न केवलं कवितायां, भाषायां अपि च स्वतन्त्र इति निश्चयो भवति। मनोहर कथाकल्पने अस्य प्रतिभा अप्रतिमेति "प्रतिमा" "उद्घोषते।" अविमारके सुकुमारबन्धं विराजते। "प्रतिज्ञाया" मस्य प्रज्ञा प्रस्फुटा भवति॥

"स्वप्नवासवदत्ता" अस्वप्नमनोहरा वर्तते। "चारुदत्तं" विचार चारु भवति। "मध्यमः" तनुमध्यमा नायिकेव सर्वाङ्गसुन्दरा वर्तते। एव मन्या अपि कवेरस्य कृतयः

मधुरतरा एव। शक्तित्रयं राजनीति च यथार्हं वर्णयामास। वेदानां शास्त्राणाञ्च परिज्ञानं कथासन्निवेशमनुसृत्य प्रकटीचकार। कथावस्तुनः, पात्राणां रसस्य च परिपोषणे कविरयं सिद्धहस्त इति पण्डित प्रकाण्डानामाशयः। भासनाटकानां तदनन्तर कालिकानाञ्च मिथः भेदो दृश्यते। भासनाटकेषु सूत्रधारप्रवेशानन्तरमेव नान्दीपठनं निबद्धम्। इतरेषु नाटकेषुनान्दीपठनानन्तरमेव सूत्रधारप्रवेशः। प्रस्तावनायान्तु कविप्रशंसनादिकं भासनाटकेषु नाद्रियते। काव्यन्तर नाटकेषु, तस्य प्राधान्यं दृश्यते। एवं अस्य, अन्येषाञ्च रचनासु ईषद् भेदो दृश्यते। लक्षणानां, लाक्षणिकानाञ्च, कालभेद इव तत्र कारणं स्यात्। साहित्यदर्पणे दृश्यमानः रूपकविभाग भासकाले नानुसृत इति। "मध्यमव्यायोगेन" स्फुटी भवति। एतदीय भारतवाक्येषु समालोचितेषु विष्णु भक्तोयमिति स्फुरति।

"यत्ने कृते यदि न सिध्यति कोत्र दोषः"
"कर्तारि स्सुलभा लोके विज्ञातारस्तु दुर्लभाः"।
"उद्योगिनं पुरुषसिंह मुपैति लक्ष्मीः"

इत्यादीन्येतदीयानिति निगदयमाना श्लोकचरणानि कवेरस्य उदात्तताया:, लौकिक विज्ञान नैपुण्यस्य च उदाहरणानीति शम्॥

हर्षवर्धनः (श्रीहर्षः)

अस्य संपूर्णं नाम हर्षवर्धनशिलार्दित्य इति। प्रभाकरवर्धनः अस्य पिता। मातातु यशोमती नाम्नी। राज्यवर्धनः अस्य अग्रजः। अस्य अपरं नाम प्रतापशीलः। राज्यश्रीः अस्य सोदरी॥ कान्यकुब्जदेशीयः 600Ad काले अयं राज्यमपालयदिति ज्ञायते। अस्य आस्थाने अनेके कवयः आसन्। रत्नावली-नागानन्दं प्रियदर्शिकेति-रूपकत्रयमनेन कृतम्। राज्यवर्धनः युद्धे शतृभिः हतः। ततःपरमयं राज्यं प्राप्तवान्। इयं कथा बाणविरचिते "हर्षचरिते" आदितः पञ्च उच्छ्वासेषु उपवर्णिता भवति। पुष्पभूति नामकः परमशैवः स्थानेश्वर नगरवासी राजा आसीदिति, तस्य वंशीय एवायमिति च ज्ञायते। अस्य राज्यपालनसमये चैनादेशयात्रिकः भारत देशमागत्य हर्षं प्रति किञ्चित् लिखितवान्। तदनुसारेणायं महाबुद्धिमान् वीरः इति ज्ञायते। अस्य पालनसमये अपराधाः स्वल्पाः, प्रजाश्च सुखिनः, सन्तुष्टाश्च बभूवुः। अस्य राज्यविस्तारः हिमालया

दारभ्य नर्मदा मालव गुजरात सौराष्ट्र वङ्गदेश पर्यन्त-मासीत् । अस्य आस्थानकविषु मयूरबाणभट्टौ-मुख्यौ ।।

अयं राजा कविश्च रूपकत्रयं उपरूपकाणि, एकं व्याकाणग्रन्थमपि रचयामास । केचिदस्य ग्रन्थकर्तृत्वे सन्दिहाना वर्तन्ते । राज्यपालने निमग्नस्य रचनाव्यासङ्गं कथं वा भवेत् । केचन कवयः अस्मात् धनादिकं गृहीत्वा ग्रन्थान् विरच्य हर्षनामाङ्कितं कृतवन्त इति तेषां अभिप्रायः । अपि च काव्यप्रकाशे "श्रीहर्षादेर्धावकादीना मिव धनम्" इत्युक्तम् । अस्य टीकायां धावक नामा कविः रत्नावलीनाटिकां विरच्य हर्षकर्तृत्वं तस्य परिकल्प्य अधिकं धनं हर्षाल्लब्धवानिति लिखितवान् । किन्तु मालविकाग्नि-मित्रप्रस्तावनायां धावकप्रस्तावः वर्तते । तथासति धावकस्य हर्षकालिकत्व मसङ्गतं भवति । संस्कृत साहित्ये त्रयः हर्षाः दृश्यन्ते-तत्र एकः प्रसिद्धः दार्शनिकः नैषधीयचरितकर्ता । द्वितीयः काश्मीरदेशाधीश्वरः । तृतीयः प्रभाकरवर्धनस्य पुत्रः हर्षः । शैलीपर्यालोचनेन कविकाल विमर्शनेन च प्रथम द्वितीयौ रत्नावलीकर्तारौ न भवतः, किन्तु तृतीय एवेति निश्चितो भवति । भोज प्रभृतयो अनेके राजानः साहित्यादि ग्रन्थनिर्माणे समर्था एव आसन्निति अस्माभिः सम्यक् ज्ञायते । तद्वदयमपि

हर्षः यद्यपि राज्यपालनधूर्वहोपि उत्कंटसाहित्यपिपासया रूपकाण्यपि रचयामासेति रूपकाणि व्यरचयदिति वचने न कापि क्षतिः ।।

त्रयाणामपि रूपकाणां प्रस्तावनायाः परिशीलनेन प्रियदर्शिका नागानन्दयोः समानश्लोकसद्भावेन रत्नावल्यां प्रियदर्शिकायाश्च, श्लोकस्यैकस्य अभिन्नतया दृश्यमानत्वेन शैलीपर्यालोचनया च एककर्तृकत्वं साधयितुं शक्यते। अस्य कवेः रचनाक्रम मनुसृत्य "प्रियदर्शिका" अस्य प्राथमिकः ग्रन्थः भवितु महंति। अस्यां नाटिकायां चत्वारः अङ्काः वर्तन्ते। अस्यां वत्सराजस्य अन्तःपुर प्रेमकथा वर्णिता। अस्याः नाटिकायाः, मालविकाग्नि मित्रस्य परिपूर्ण साम्यं दृश्यते। राजा दृढवर्मा युद्धे पराजितः। तस्य कन्या प्रियदर्शिका, दैववशात् वत्सराजस्य अन्तःपुरं प्राप्तवती। तत्र सा आरण्यकेति नाम्ना व्यवह्रियमाणा दासी आसीत्। वत्सः आरण्यकायाः सौन्दर्येण अतीव मुग्ध आसीत्। अन्तःपुररङ्गस्थले प्रवृत्ताभिनय आरण्यका वासवदत्ता पात्रं, राजा वरपात्रं च अधरताम्। अनयोः प्रेमव्यवहारः अन्वर्थतां गतः। राज्ञी एत द्वृत्तान्तं विज्ञाय ईर्ष्यया तां कारागारं प्रवेशयामास। अन्ततः आरण्यका राजकुलोत्पन्नेति रहस्यं प्रकटी भवति। वासवदत्ता तां कारातः मोचयति। वासवदत्तायाः

अनुमत्या राजा तां परिणीतवान् । अस्याः कथायाः मूलं बृहत्कथायां अस्ति । किन्तु रसपोषणाय तत्र तत्र कल्पिताः अंशा अनेके मनोहरा वर्तन्ते । तृतीयाङ्के गर्भाङ्के नाटकास्तु नाटिकायाः उत्कृष्टः प्रतिपादितः वर्तते। प्रसादगुणयुक्तशैल्या सारल्येन, उत्साह जनक घटनाभिः इयं नाटिका दृश्यकाव्येषु प्रमुखं स्थानं भजते ॥

अस्य द्वितीय रचना "रत्नावली" इति तर्क्यते । अस्यां कलापूर्णत्वं लक्षणयुक्तता च वर्तते । अस्यां नाटिकायां प्रधानरसः श्रृङ्गारः । नायकस्तु धीरललितः । अभिनययोग्यता च अस्याः नाटिकाया, सुष्टु वर्तते । न केवलं काव्यचारुता, अपि तु चारित्रकचित्रणमपि सहृदयहृदयान्यावर्जयति । दशरूपके, साहित्यदर्पणे च उदाहरणतया अस्याः नाटिकायाः श्लोका उद्धृता वर्तन्ते । कठिनसमासाः अप्रसिद्धपदानि च अत्र न दृश्यन्ते । सन्ध्याकालवर्णनेन साकं वासवदत्तायाः वर्णनं च कविना "देवि, त्वन्मुखाङ्केन ..... सञ्जात लज्जा इव" इति मनोहरं वर्णितम् ।

नागानन्द नाटकमपि अस्ते विरचितवानिति प्रतीतिः। जीमूतवाहनाख्यः विद्याधर राजकुमारः, शङ्खचूडनाम्नः सर्पकुमारस्य प्राणपरित्राणार्थं स्वशरीरं गरुत्मते ददाति ।

ततः परं गौर्याः अनुग्रहेण पुनरुज्जीवितस्सन् पितृशुश्रूषा-परायणो भवति। इयं कथा बुद्धमतानुसारिणीति प्रतीतिः। परोपकाराय स्वशरीरदानं बुद्धकालात्पूर्वस्मादपि कालात् भारते अस्ति किल। नागानन्दोयं बुद्धमताव-लम्बिना केनचिद् लिखितमन्येनेत्यन्येषा मभिप्रायः।

कालिदासः

अयं 5 C. Ad. काले आसीदिति Maxmuller नामकः विमर्शकः वदति। अत्रतु 'दिङ्नागा पथि परिहरन् स्थूल हस्तावलेपान्" इत्येतदीयमेव मेघसन्देशपद्यं प्रमाणत्वेन वदति। तस्मिन् श्लोके 14 C. Ad. कालिकेन मल्लिनाथेन स्वव्याख्यायां दिङ्नागनामा कश्चन कविः कालिदासस्य समकालिकः तस्य प्रतिद्वन्द्वी चासीत्। अतः कालिदासेन दिग्गजप्रस्तावेन दिङ्नाग नामककवेः गर्वभङ्गरूप शृङ्गभङ्गः क्रियत इत्यवर्णि। तदेतदापतरमणी च 'दिङ्नाग नामा' कश्चन ब्राह्मणः संपर्केण बौद्धः अभवत्। दिङ्नागः वसुबन्धुः, नामकस्य शिष्य इति ज्ञायते। सतु वसुबन्धुः विक्रमादित्य सदस्यः। विक्रमादित्यस्तु 6 Ad. पूर्वं नासीत्। अतः दिङ्नागोऽयं

बौद्धः उत अन्यः वा इति संशयः जायते। अन्ये केचित् इत्थं आहुः "आर्यभट्टः भारतीयः ग्रीक्देशं गत्वा ज्योतिश्शास्त्रं अधीते स्म। तदनन्तरमेव भारतदेशे ज्योतिश्शास्त्रप्रचारः बहुलः आसीत्"। कालिदासः रघुवंशे "छाया हि भूमेः शशिनोमलत्वेन आरोपित" इति चन्द्रनिष्ट मलत्वस्य, भूच्छायत्वेनैव वर्णनात् कालिदासस्य ज्योतिश्शास्त्रेपि परं प्रावीण्यं ज्ञायते। आर्यभट्ट एव एतादृशं सिद्धान्तं प्रथमतया प्रकटीकृतावन् इति ज्ञायते ॥

अतः कालिदासः आर्यभट्टात् अनन्तरकालिक इति वक्तुं शक्यते। आर्यभट्टस्तु 499 Ad, कालिकः, तथा च कालिदासः 6 Ad. कालिक इति पर्यवस्यति। वस्तुतस्तु पर्यालोचने कालिदासः 5 th A D कालादपि प्राचीन इति वक्तुं शक्यते। तथाहि "विजयतां रविकीर्तिः कविताश्रित कालिदास, भावि भारविकीर्तिः" इति। 634 A D कालिके कस्मिन्चित् शिलाशासने दृश्यते। 7 A D कालिकः श्रीहर्षदेवसदस्यः भाणकविरपि 'निगतासु नवा कस्य कालिदासस्य सूक्तिषु। प्रीतिर्मधुरसाद्रासुझरीस्विव जायते इति कालिदासकविं स्तौति। तस्मात् कारणात् तस्मिन् काले कालिदासः सुतरां प्रसिद्ध आसीत् इति ज्ञायते। तादृश प्रसिद्धः कस्यचित् स्वकालानन्तरम् त्रिचतुर शताब्दात् अनन्तरं एव पुष्कला भवतीति कारणात्,

शिलालेखादि प्रामाण्येन त्रिचतुर शतक प्राक्तनत्वमस्य कालिदासस्य भवति। किं च 'संपत्स्यते न खलु गोप्तरि नाग्निमित्रे' इति मालविकाग्निमित्रे भरतवाक्यदर्शनेन भरतवाक्ये च गोप्तरीत्यत्र "यस्य च भावन भाव लक्षण" इति सप्तमी प्रयोगदर्शनात् कालिदासस्य अग्नि मित्रसमकालिकत्वं उच्यते ॥

अग्निमित्रस्तु B C I and II C. कालिको भवति। यतः भगवान् पंतजलिः "इह पुष्पमित्रं याजयामः" इति प्रयुंक्ते। अयं च पुष्पमित्रः अग्निमित्रस्य पितेति ज्ञायते। अपि चाऽयं कविः स्वीये शाकुन्तले विधवायाः भर्तुरिक्तार्हतां, मनुबोधायनादीनां मतमनुसृत्य अकथयत्। याज्ञवल्क्यादयस्तु विधवायाः भर्तुरिकथे अवकाशं कल्पयन्ति। तस्मात् अयं मन्वादीनां अर्वाक् याज्ञवकल्क्यादीनां प्राक् च अवर्तत इति निर्धार्यते। अपि च मन्वादयः चोरस्य वधदण्डं वदन्ति। बृहस्पत्यादयस्तु चोरस्य प्रायश्चित्तं, वधो वा विकल्पयन्ति। शाकुन्तले षष्ठाऽङ्के प्रवेशके धीवर वृत्तान्तेन कालिदासस्य काले चोरस्य वधदण्डः आसीत् इति ज्ञायते। तस्मात् अयं कालिदासः बृहस्पतेः प्राचीन कालिक इति फलति। सतु बृहस्पति I A.D कालिकः इति संभाव्यते। तस्मात् अयं कालिदासः I A.D तः पूर्वकालिक. इत्यूह्यते। कविरऽयं शैवः उत वैष्णवः इति

विचारे कृते यद्यपि निष्कृष्य वक्तुं न शक्यते, तथापि वर्णनाशौल्या परिशील्यमानया अस्य कवेः शिवे प्रतिपत्तिः महतीति ज्ञायते। क्वचित् वर्णने त्रिमूर्तीनां साम्यं प्रतिपादितवान्।

यथा–"एकैव मूर्तिः बिभिधे त्रिधा सा" इत्यवर्णयत्॥ अस्य दीपशिखा कालिदास इति बिरुदं वर्तते। तत्र तु "संचारिणी दीपशिखेव रात्रौ" इति पद्ये तादृशोपमादानमेव निमित्तं इति एतन्मूलक मेव उपमा कालिदास स्येति। उपमायां अस्य प्राशस्त्यमपि।

अस्य काव्यानि प्रायशः रामायणं भारतं वा मूलत्वेन अवलंब्यैव प्रवृत्तानि॥

काव्यत्रय रूपकत्रयं च कालिदासकृतत्वेन प्रसिद्धम्। श्रुतबोध सेतुबन्ध नलोदय राक्षस काव्य पुष्पबाण विलास शृंगार तिलक प्रहसनादीनां अपि कर्ताऽयं इति लोके प्रतीतिः वर्तते। (1) तत्र रघुवंशम् –

अस्मिन् काव्ये दिलीपा दारभ्य अग्निवर्मपर्यन्तं सूर्यवंशीयाः एकत्रिंशत् राजानः वर्णिताः। अस्मिन् काव्ये 19 एकोनविंशति सर्गाः वर्तन्ते। विलापवर्णने, वधूवरयोः नगरप्रवेश वर्णने, स्त्रीणां आचार वर्णने च रघुवंशकुमारसंभवयोः मिथः सादृश्यं वर्तते।

उपजातरथोद्धत, गतिवियोगिनीवंशस्य, दूत विलंबादिषु श्राव्येषु वृत्तेषु अस्य कवेः अभिलाष इति ज्ञायते। अलङ्कारेषु – उपमालङ्कारं अधिकं उपयुङ्क्ते ।।

(2) कुमारसंभवः – अस्मिन् काव्ये (17) सप्त दश सर्गाः वर्तन्ते। अत्र आदिमाः (4) चत्वारः सर्गा एव अनेन विरचिताः इति केषांचन विमर्शकानां अभिप्रायः। अष्टमोपि सर्गः अनेन विरचित इति रसिकानां आशयः। काव्येस्मिन् शिवस्य, पार्वत्याश्च अतीव मनोहरतया वर्णितः शिवपार्वत्योः विवाहघट्टः अपि रमणीयतरः ।।

(3) मेघसंदेशः – अयं पूर्वमेघः उत्तरमेघः इति द्विधा विभज्यते। शापेन प्रियाविरहिणः कस्यचित् यक्षस्य मेघद्वारा स्वप्रियां प्रति संदेशप्रेषण मेव अत्र कथा। रामायणे हनुमत् संदेशं मनसि निधाय कालिदासः कामरूपस्य मेघस्य संदेशहारकत्वं सामर्थ्यं चारुतरया रीत्या संदेशकाव्यं रचयामास। वर्णनाशैली च तन्त्रीनिनादवत् श्रवणसुभगा भवति।

शाकुन्तलम्-कालिदास नाटकेषु इदं नाटकं प्रथमगण्यं भवति। यद्यपि इयं कथावस्तु महाभारते पद्मपुराणे वर्तते, तथापि शाकुन्तले तत्र तत्र कथांशे भेदः दृश्यते।

विक्रमोर्वशीयम् – अत्रत्य कथा ऋग्वेदे प्रस्तुता। इयं मत्स्यविष्णुपुराणेषु च किंचित् भेदेन दृश्यते। कलिदासः मत्स्यपुराणकथां स्वीकृतवान्। केनचित् असुरे विप्रकृतं ऊर्वशीं पुरूरवः रक्षति। सा च तेन वशीकृता तं कामयते। तयोः संयोगवियोगादयः अन्ते सुखप्राप्तिश्च वर्णितः॥

मालविकाग्निमित्रम् – अत्र उभयोरपि नायकयोः मानुषत्वं एव, राजान्तःपुरे प्रवृत्तं पूर्वकालिकचरितं अस्मिन् नाटके सम्यक् प्रतिबिम्बितं भवति। कालिदासीय नाटकेषु इद मेव प्रथमं इति मन्यते। एतन्नाटक मेव आधारीकृत्य श्रीहर्षस्य रत्नावल्यादिकं प्रवृत्तं इति केषांचित् आशयः।

अत्र राजा मालविका नाम्नीं स्वपट्टमहिष्या धारिण्या प्रवर्धितां कामयते। अनयोः समागमः विघ्नैः निहन्यमानोपि अन्ते धारिन्याः अनुज्ञया संपादितो भवति। सापि मालविका राजकन्यैव, कुत्रचित गच्छन्ती मध्ये मार्गं चौरैः अपहृता केनापि प्रकारेण धारिणी हस्त मुपगता। अत एव धारिण्या पूर्वं न प्रत्यभिज्ञाता॥



विजय मुद्राशाला, चित्तूरु ५१७ ००१